गतौ देहत्यागः इति च स्पष्टनिर्णीतमिदम् । आचार्याणां चरमश्लोकश्चात्र प्रमाणम् ; यथा—

"अब्दे सौम्ये च वारे गतवति तरणौ वृश्चिकं कृत्तिकर्क्षे
राकायां वेङ्कटेशो यतिनृपतिमतं सर्वतः स्थापयित्वा ।
वेदान्ताचार्यनामा विरचितविविधानेकदिव्यप्रबन्धः
श्रीशैलाधीशघण्टाकृतिवपुरभवद्देशिकेन्द्रो दयालुः ॥"

इति हि निर्णीतम्। क्रैस्तववर्षे(१२७०)सप्तत्युत्तरद्विशताधिक-सहस्रतम आचार्याविर्भावः। (१३७२) द्वासप्तत्युत्तरत्रिशताधिक-सहस्रतमे देहत्यागः इत्यपि सुगमम् । काञ्च्यां तूप्पुल् इति प्रसिद्धं दीपप्रकाशाभिधानस्यार्चारूपस्य भगवतः प्रासादान्तिक-मेव च स्थानमाविर्भावतिरोभावयोः इति च देशनिर्णयः ॥

तमेतं सर्वभूतेष्वविशेषप्रसरत्कारुण्यकल्लोलकलापं तत्त्वकथनैकतत्परमप्रतिद्वन्द्वमाचार्यवर्यम्, अनेन प्रदर्शितघण्टापथमसकृत्परिमार्जननिरस्तपांसुप्रसङ्गं श्रीभगवद्रामानुजसिद्धान्तं चावलम्ब्य कृत्स्न एव लोकोऽयं समग्रस्य श्रेयसो भवतु भाजनमिति चिरन्तनीमस्मत्प्रार्थनामत्र निवेदयामः । ये तावदत्राचार्यपुरुषाः, ये च तदनुयायिनः शिष्याः श्रीवैष्णवव्यञ्जनव्यञ्जितप्रशस्तयस्ते सर्वेपि श्रीमद्रामानुजयोगिवर्याणामेतेषां च देशिकेन्द्राणामाशयानुरोधेन स्व

मतस्थान् विमतस्थानपि वा सर्वानेव प्रज्ञावृद्धान् विधूताभिनिवेश-पक्षपातादिदोषैरुपन्यासैः सरसैरावर्जितानेतत्सिद्धान्तप्रवेशप्रणीतोत्कर्षान् स्वपक्षे निक्षिप्य तैः सहाभ्यवहारोपयमादिसंव्यवहारानव्यतिरेकेण व्यवहरन्त ऐहलौकिकं पारलौकिकं च श्रेयः सर्वसुलभं विधाय निरसूयाः प्रमोदन्तामिति च बद्धाञ्जलिः प्रार्थये ॥

श्रीमानाम्नायचूडागुरुरनघगुणो जाह्नवीवीचिमाला-
लीलामालम्बमानैर्बहुतरविषयापूरणैरस्तशोषैः ।
वाचामाचान्तदृप्यत्प्रतिकथकघटादर्पसारैः प्रसारै-
र्धिन्वन् लोकं समस्तं जयति जनिमतां श्रेयसे देशिकेन्द्रः ॥

इति विज्ञप्तिरियं

शतावधानम् श्रीनिवासाचार्यस्य ॥

जडं च द्वेधा प्रकृतिः काल इति । १२

अजडं च तथा प्रत्यक् परागिति । १३

प्रत्यगपि द्विविधं जीव ईश्वर इति । १४

परागपि तथा धर्मभूतज्ञानं नित्यविभूतिश्चेति । १५

अथवा द्रव्यं द्विविधमात्मानात्मभेदात् । १६

त्रेधा वा भोक्तृभोग्यनियन्तृश्रुत्यनुसारात् । १७

षोढा वा त्रिगुणकालजीवेश्वरशुद्धसत्त्वमतिभेदात् । १८

अस्वयंप्रकाशं जडम् । १९

स्वयंप्रकाशमजडम् । २०

मिश्रसत्त्वाश्रयः प्रकृतिः । २१

कालः क्षणलवादिव्यवहारहेतुः । २२

स्वस्मै भासमानं प्रत्यक् । २३

परस्मै भासमानं पराक् । २४

परतन्त्रचेतनो जीवः । २५

स्वतन्त्र ईश्वरः । २६

अर्थप्रकाशो बुद्धिः । २७

तुदृष्टान्तादेर्विपर्यासेन वचने अवयवविपर्यासः, अनित्यः शब्द इत्यादाववयवांशविपर्यासः, तर्कमभिधाय प्रयोगे अङ्गाङ्गिविपर्यासः, वाद्युक्तमशेषमदूषयित्वा प्रतिवादिना स्वपक्षसाधने वादविपर्यास इत्यादि । वाक्यस्य परप्रत्यायनार्थत्वाद्विपर्यासेपि परप्रत्ययसंभवाभिमानात् तदुक्तिसंभवः । नियमकथायामभ्युपगतक्रमातिक्रमेण न कुर्यादिति रहस्यम् । अनित्यः शब्द इत्यादिप्रयोगस्तु विपर्यासेपि शीघ्रान्वयप्रतिपत्तेरनियमकथायां वादे च सोढव्य इत्यादि ॥

## ॥ अविज्ञातार्थम् ॥

त्रिभङ्ग्यन्तराभिधानेपि प्राश्निकप्रतिवादिष्वन्यतमेनाप्यज्ञातार्थं वचनमविज्ञातार्थम् । तच्चाप्रसिद्धप्रयोगस्वसिद्धान्तमात्रसिद्धप्रयोगार्थान्तरसाधारणप्रयोगादिभेदाद्बहुविधम् । तत्राप्रसिद्धप्रयोगो यथा—अहार्यो वीतिहोत्रत्रानित्यादिः । स्वसिद्धान्तमात्रसिद्धप्रयोगो यथा—पञ्चस्कन्धद्वादशायतनादिप्रयोगः सौगतानाम्; अस्तिकायपर्यायपुद्गलादिप्रयोगो दिगम्बराणाम् ; यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञादिप्रयोगः पातञ्जलानाम् ;

१. वाद्युक्तमदूषयित्वा.

| पृष्ठम् | पङ्क्तिः | अशुद्धम् . | शुद्धम् . |
|---|---|---|---|
| १५५ | १६ | तेच्चत् | तच्चेत् |
| १५८ | १ | दृष्टत्व | दुष्टत्व |
| १६१ | १५ | चतुष्कावतरणात् | चतुष्कावेतरणात् |
| | १७ | न्यतरेण | २. चतुष्कान्यतरेण |
| १६२ | ४ | प्रप्ता | प्राप्ता |
| १६८ | ३ | ' इति । ' इत्येतत् अपोहनीयम् | |
| १७० | १६ | दुष्टो | दृष्टो |
| १८४ | ७ | वायच्म् | वाच्यम् |
| २०८ | १६ | यद्येप्येवं | यद्यप्येवं |
| २२२ | ४ | न्यधापनम् | न्यथापनम् |
| २२५ | ९ | मवापतेत् | मेवापतेत् |
| २२९ | ४ | लौकिकनीति | लौकिकानीति |
| | १६ | झटाति | झटिति |
| २३० | ? | न्तेरणा | न्तरेणा- |
| २३२ | १० | सिंह्म | सिंह |
| २३३ | ६ | वावयार्थे | वाक्यार्थे |
| २३४ | १ | इत्याधिकरणे | इत्यधिकरणे |
| २४० | १३ | खत्विदं | खल्विदं |

